दिनाङ्क :- 08.11.2025

प्रात: - 06:55

## प्रधानमन्त्री-वाराणसी

प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य वाराणस्यां चतुर्णां नूतनानां वंदेभारत्-एक्स्प्रेस्-रेलयानानां ध्वजारोहणं विधास्यति। श्रीमोदी ह्यः सायङ्काले स्वसंसदीयक्षेत्रम् वाराणसीम् समागच्छत्। मोदी-वर्यस्य आगमनसमये नगरस्य जनाः दलस्य कार्यकर्तारः च तस्य भव्यं स्वागतम् अकुर्वन्। नूत्नानि वंदेभारत एक्स्प्रेस्-रेलयानानि बनारस-खजुराहो, लखनऊ -सहारनपुर, फिरोजपुर-दिल्ली, एर्नाकुलम्-बेङ्गळूरु-मार्गेषु च प्रचलन्ति। एतानि रेलयानानि यात्रा-समयं न्यूनीकर्तुं, क्षेत्रीय-गतिशीलतां वर्धयितुं, पर्यटनस्य प्रोत्साहनं कर्तुं, कृत्स्ने हि देशे आर्थिकगतिविधिनां समर्थनं च करिष्यन्ति।

## प्रधानमन्त्री-वन्देमातरम्

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्यां राष्ट्रगीतस्य "वंदे मातरम्" इत्यस्य पञ्चाशदुत्तरैकशत-तम्याः वर्षपूर्त्यवसरे स्मरणोत्सवस्य उद्घाटनम् अकरोत्। अस्मिन् अवसरे प्रधानमन्त्रिणा स्मारक-मुद्रिकायाः मुद्रायाः च विमोचनं कृतम्। नवदिल्ल्यां इन्दिरागान्धी-इन्डोर-स्टेडियम्- इति क्रीडाङ्गणे कार्यक्रमं सम्बोधयन् प्रधानमन्त्री अवदत् यत् वंदे मातरम् इति मन्त्रं, ऊर्जा, स्वप्नम्, संकल्पः च अस्ति । सः एतत् मन्त्रं भारतमातुः भक्त्याराधनयोः कृते प्रशंसितवान् यन्मन्त्रम् इतिहासं प्रति पुनः नयति, वर्तमानं आत्मविश्वासेन पूरयति, तथा च भविष्याय नूतनं साहसम् प्रयच्छति यथा किमपि संकल्पं साधयितुं शक्यते तथा च किमपि लक्ष्यं नास्ति यत् साधयितुं न शक्यते ।

## राष्ट्रपति/यात्रा

राष्ट्रपतिपदासीना द्रौपदी मुर्मू: अद्य अङ्गोला-बोट्स्वाना-देशयोः यात्रां करिष्यति। राष्ट्रपतिः तस्याः समकक्षस्य जोआओ मेनुयल् गोन्साल्वेस् लौरेन्को इत्यस्य आमन्त्रणेन प्रवासस्य प्रथमपादे अङ्गोला-देशं प्रति एष्यति। अस्मिन् वर्षे भारत-अङ्गोला-देशौ कूटनीती-सम्बन्धस्य चत्वारिंशततमं वार्षिकोत्सवम् आचरत:।

## बिहार-निर्वाचनम्

बिहार-विधानसभा-निर्वाचनस्य द्वितीयस्य अन्तिमस्य च चरणस्य निर्वाचनस्य प्रचारः चरमोत्कर्षं प्राप्नोत्। एन्. डी. ए. , महाघटबन्धन् इत्येतयोः दलयोः वरिष्ठनेतारः प्रमुख-प्रचारकाः च अन्यदलनेतृभिः सह मतदानक्षेत्रेषु भ्रमणं कुर्वन्तः सन्ति । औरंगाबादजनपदे एकां जनसभां संबोधयन् , भाजपादलस्य वरिष्ठनेता प्रधानमंत्री च नरेंद्रमोदी अकथयत् यत् एनडीएदलम एव विकसितस्य बिहारस्य निर्माणं करिष्यति । सः अकथय़त् यत् बिहारः एनडीए-दलस्य घोषणापत्रे विश्वसिति ।

भभुआजनपदे एकाम् अन्याम् जनसभां संबोधयन्, प्रधानमंत्री आरोपं प्रख्यापितवान् यत् राजद-कांग्रेस-दले बिहारस्य युवानः प्रथभ्रष्टं कर्तुं अनेकान् प्रयासान् अकुरुताम् परञ्च तयोः एताः योजनाः विफलीभूताः । सीमांचल्, मगध, शाहाबाद्, चम्पारण् इत्येतेषु मण्डलेषु विभिन्नेषु दलानां नेतारः सघनानि निर्वाचन-अभियानानि आचरन्ति। काङ्ग्रेस्-दलस्य नेता राहुलगान्धीवर्यः बाङ्का-नगरे महाघटबन्धन-दलस्य अभ्यर्थिनां कृते जनसभां सम्बोधयत्। श्रीगान्धी अवदत् यत् बिहारस्य जनाः स्व-अधिकारविषये अवगताः सन्ति। आर्.जे.डी. दलस्य नेता तेजस्वी-प्रसाद-यादवः अररिया-नगरस्य जोकिहाट-नगरे निर्वाचनसमारोहं समबोधयत्।

### पुरुष-क्रिकेट्

पुरुष-क्रिकेट्-क्रीडायां अद्य ब्रिस्बेन्-नगरस्य गब्बा-क्षेत्रे पञ्च-टी-20-श्रृङ्खलायाः अन्तिमक्रीडायां आतिथेय-आस्ट्रेलिया-देशेन सह भारतं स्पर्धते। भारतीय समयानुसारं अपराह्णे पादोनद्विवादने इयं स्पर्धा आरप्स्यते इति निर्धारितम् अस्ति।